# संस्कृतवार्ता:

**दिनाङ्क :-20.01.2025**

**प्रात: - 06:55**

**विश्वार्थिकमञ्च:**

अद्यारभ्य स्विट्जरलैण्डदेशस्य दावोसनगरे विश्वार्थिकमञ्चस्य पञ्चपञ्चाशत्तमम् वार्षिकोपवेशनं समारभते। पञ्चदिवसात्मके एतस्मिन् कार्यक्रमे भारतस्य समावेशिविकास: आङ्ककीय-क्रान्ते: च प्रारूपम् उपस्थापयिष्यत:। भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: जलशक्तिमन्त्री सी.आर्. पाटिल: नागरिकोड्डयनमन्त्री के. राममोहननायडू: खाद्यप्रसंस्करणोद्योग-मन्त्री चिराग-पासवान: कौशल-विकासोद्यमिता:-राज्य-मन्त्री जयन्तचौधरी च करिष्यन्ति। अस्माकं वार्ताहर: सूचितवान् यत् भारतस्य प्रभावपूर्णा आर्थिकवृद्धि: वैश्विकध्यानं सततम् आकर्षयति सममेव प्रमुखेषु क्षेत्रेषु महत्वपूर्णप्रगत्या सह वैश्विकमञ्चे भारतस्य सुदृढास्थिति: समङ्किता भवतीति।

**दिल्लीविधानसभा-निर्वाचनम्**

दिल्लीविधानसभानिर्वाचनाय नामाङ्कनप्रत्यावर्तनाय अद्य अन्तिमं दिनं वर्तते। साम्प्रतं यावत् आहत्य नवदशाधिक-सप्तशतसङ्ख्यका: प्रत्याशिन: नैर्वाचनिक-समराङ्गणे विद्यन्ते। मुख्यनिर्वाचनाधिकारिणा सूचितं यत् द्वाविंशत्युतर-पञ्चशतोत्तरैकसहस्रं नामाङ्कनपत्राणि निरस्तानि। अवधेयं वर्तते यत् दिल्लीविधानसभायै निर्वाचनम् आगामि-मासस्य पञ्चमे दिनाङ्के एकस्मिन्नेव सोपाने भविष्यति तदनु मतगणना अष्टमे दिनाङ्के सुनिश्चिता भविष्यति।

**ट्रम्प:-शपथग्रहणम्**

डोनॉल्ड-जे-ट्रम्प-इत्येष: अद्य संयुक्तराज्यामेरिकाया: सप्तचत्वारिंशत्तमाय राष्ट्रपतिपदाय शपथवचनं स्वीकरिष्यति। अत्रावधौ तत्र तापमानं षड्-डिग्री-सेल्सियसपरिमितात् न्यूनं भविष्यति। येन हि आगम्यमाना: जना: कैपिटल-रोटुन्डाइत्यत्र उपस्थिता: भविष्यन्ति यद्धि शपथग्रहण-समारोहाय सुनिश्चितम् अभवत्। शपथग्रहणसमारोह: भारतीय-समयानुसारि रात्रौ सार्धाष्टवादने भविष्यति।

**ऋतु-विभाग:**

भारतीयऋतुविज्ञानविभागेन आगामिषु पञ्चसु दिवसेषु पश्चिमीयविक्षोभकारणेन जम्मू-कश्मीर-हिमाचलप्रदेश-उत्तराखण्ड-राज्येषु वृष्टि: हिमपातश्च अनुमानित:। ऋतुविज्ञानविभागीय: वैज्ञानिक: डॉ. नरेशकुमार: अवादीत् यत् आगामिन्यो: बुध-गुरुवासरयो: पञ्जाब-हरियाणा-पश्चिमोत्तरप्रदेश-दिल्ली-राष्ट्रिय-राजधानीक्षेत्रे-राजस्थानेषु च वृष्टे: सम्भावना वर्तते।

**माण्डविया:**

श्रममन्त्री डॉ. मनसुख-माण्डविया: अद्य नवदिल्ल्याम् अनौपचारिक-क्षेत्रस्य श्रमिकेभ्य: द्विदिवसात्मकीयाया: अन्ताराष्ट्रिय-सङ्गोष्ठ्या: उद्घाटनं करिष्यति। अस्या: सङ्गोष्ठ्या: उद्देश्यम् अनौपचारिकश्रमिकेभ्य: सामाजिकसुरक्षाप्रदानम् अथ च हितधारकाणां क्षमतावर्धनमिति वर्तते।

**गृहमन्त्री आन्ध्रप्रदेशे**

आन्ध्र-प्रदेशे केन्द्रीय गृह-सहकारिता-मन्त्री अमितशाहः विजयवाडायां एनडीआरएफ इति राष्ट्रिय-आपत्-मोचनबलस्य विंशे स्थापना-दिवस-समारोहे भागम् अभजत्। अत्रावसरे गृह-मन्त्रिणा कृष्णा विले इत्यस्य कोंडापाउलुरू क्षेत्रे राष्ट्रियापत्-प्रबन्धन-संस्थानस्य -एनआईडीएम इत्यस्य दक्षिण-परिसरस्य उद्घाटनं कृतम्।

**खो-खो**

खो-खो इति-विश्वचषकप्रतिस्पर्धायां भारतीय-पुरुष-महिला-वर्गयो: उभाभ्यां दलाभ्यां ऐतिह्यं विरच्य एषा स्पर्धा स्वनाम्नि कृता। उभाभ्यां दलाभ्याम् अन्तिमचक्रे नेपालदलं पराजितम्। भारतीयमहिलादलेन प्रथमवारं खो-खो-इति विश्वचषक: विजित:। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी भारतीयमहिलादलाय वर्धापनानि अयच्छत् उक्तवान् च यत् अयं ऐतिहासिक: विजय: महिलादलस्य उत्कृष्टकौशलस्य दृढसङ्कल्पस्य सामूहिकप्रयासस्य च परिणामो विद्यते इति।

**।। इति वार्ता:।।**